International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2025; 2(3): 30-31
© 2025 IJMH
www.themultijournal.com
Received: 14-06-2025
Accepted: 18-06-2025
Publish : 20-06-2025

**विश्वरञ्जनसाहुः**
शोधच्छात्रः, धर्मशास्त्रविभागः
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः आन्ध्रप्रदेशः

**Correspondence:**
**विश्वरञ्जनसाहुः**
शोधच्छात्रः, धर्मशास्त्रविभागः
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः आन्ध्रप्रदेशः

# आपस्तम्बधर्मसूत्रोपरि मीमांसाशास्त्रस्य प्रभावः

**विश्वरञ्जनसाहुः**

**शोधसारः**
धर्मशास्त्रीयसिद्धान्तस्तु सूत्रपरम्परायां सर्वादौ गौतमबौधायनापस्तम्बप्रभृतिधर्मसूत्रेषु नैकशास्त्र-सम्मतविहितकर्मणां प्रतिपत्तिविधायकत्वेन श्लाघ्यते। धर्मसूत्रेषु प्रायशः प्रमुखत्वेन प्रतिपाद्यविषयाः आश्रमधर्मनिरूपणं तद्बोधकधर्मः तद्गतवर्णादिव्यवस्था च। परन्तु आपस्तम्बधर्मसूत्रे नैकप्रयोगो दृश्यते यत्र स्पष्टमनुमीयते यदत्र मीमांसाशास्त्रस्य प्रसक्तिः व्यज्यते। अत्र मीमांसायां प्रतिपादितधर्मसिद्धान्तः चोदनालक्षणार्थो धर्मरूपत्वे स्वतः प्रयोगः नैकसूत्रेषु तत्परकविनियोगश्च लक्ष्यते। न केवलं पूर्वमीमांसा-शास्त्रत्वेन जैमिनेः मतं दृश्यते अपितु उत्तरमीमांसाशास्त्रोक्ताध्यात्मिकक्रियाविधिः आत्मज्ञानस्वरूपं गौतमाद् बौधायनाद् वा विलक्षणस्वरूपमापस्तम्बधर्मसूत्रे प्राप्यते।
**पारिभाषिकशब्दाः** मीमांसा, धर्मः, धार्मिकक्रियाविधिः, वेदान्तः

धर्मविचारकशास्त्रत्वेन मीमांसायाः पर्यवसानं सुतरां धार्मिकक्रियाकलापानामाचरणे प्रवर्तते। यथा धर्मशास्त्रे धर्मस्य सिद्धान्ताः प्रतीयन्ते तद्वत् मीमांसायामस्य विचारः क्रियते। धर्मस्य साक्षात् लक्षणमत्र बहुधा व्यपदिष्टं वर्तते। अत्रोक्तधर्मः यागादित्वेन अग्निहोत्रम् अग्निष्टोमादित्वेन प्राप्यते।

धर्मस्य विषयं वक्तुं मीमांसायाः प्रयोजनमिति पारिभाषिकतार्किकविधानात्प्रतीयते धर्मशास्त्रे यथा धर्मस्य स्रोतः परिभाषते तथा पूर्वमीमांसायां धार्मिकक्रियाविधिः याज्ञिकपरितन्त्राणि च विन्यस्यते। यज्ञे व्यवहृतानां विविधक्रियाकलापानां तदन्तर्गतविषयाणां च परिशीलनं तथा व्याख्यानात्मकभागो यद्यपि पूर्वमीमांसायां पर्यवेसितो भवति तथापि अत्र नैकविधविषयाः धर्मसर्वस्वभूताः सन्ति। तदर्थमादौ जैमिनिना अपि सूत्रं प्रोक्तं वर्तते यत् –

**अथातौ धर्मजिज्ञासा**[1]

**चोदनालक्षणार्थो धर्मः।**[2]

अन्यच्चापि मीमांसाग्रन्थेषु धर्मस्य विविधपरिभाषाः तस्य क्रियानुष्ठानत्वं स्पष्टीयन्ते। यथा मीमांसापरिभाषायां जैमिनीयन्यायमालाविस्तरे अर्थसंग्रहे चास्य महत् वैशिष्ट्यं परिलक्ष्यते। तदर्थं मीमांसायां वेदेन प्रयोजनमुद्दिश्य विधीयमानार्थो धर्मः[3]

**वेदबोधितेष्टसाधनताको धर्मः**[4] इत्यादिधर्मलक्षणं सूत्राकारेण विहितं वर्तते।

परन्तु आपस्तम्बधर्मसूत्रे विविधविषयैस्सार्द्धं मीमांसासूत्राणां साम्यतां परिज्ञाय तदन्तर्गत-विषयत्वेनास्य ग्रहणं कर्तुं शक्यते। यथा –

**अङ्गानां तु प्रधानैरव्यपदेशः इति न्यासविस्समयः।**[5]

**अथापि नित्यानुवादविधिमाहुन्यायविदः।**[6]

पूर्वमीमांसायां तद्वत्सूत्रमप्यर्थवादप्रसङ्गे आम्नायते यत् –

**अर्थवादो वा विधिशेषत्वात्तस्मान्नित्यानुवादः।**[7]

एवमेव बहुत्र पूर्वमीमांसासूत्रैः सह आपस्तम्बधर्मसूत्रस्य समानता परिलक्ष्यते।
आपस्तम्बधर्मसूत्रम्

**तस्यां क्रयशब्दः सस्तुतिमात्रम् धर्माद्धि सम्बन्धः।**[8]

**विद्यां प्रत्यनध्यायः श्रूयते न कर्मयोगे मन्त्राणाम्।**[9]

**श्रुतिर्हि बलीयसी मानिकादाचारात्।**[10]

यत्र तु प्रीत्युपलब्धितः प्रवृत्तिर्न तत्र शास्त्रमिति।

एतेषां सूत्राणां साम्यं पूर्वमीमांसायां जैमिनिना अपि अभिहितं वर्तते। तद्यथा –

**क्रयस्य धर्ममात्रत्वम्।**[11]

**विद्यां प्रति विधानाद्वा सर्वकालं प्रयोगः स्यात्कर्मार्थत्वाप्रयोगस्य।**[12]

**विरोधे त्वनपेक्ष्यं स्यादसति ह्यनुमानम्।**[13]

**यस्मिन्प्रीतिः पुरुषस्य तस्य लिप्सार्थलक्षणविभक्तत्वात्।**[14]

अतः इमानि सूत्राणि समधीत्य इदं वक्तुं शक्यते यत् आपस्तम्बेन जैमिनीयपूर्वमीमांसाशास्त्रैः सह सम्बन्धितः अधीतश्च। तदर्थं पी. वी. काणे अपि स्वीयमतं प्रास्तौत्।

**The correspondence in language with the Purvamimansa-sutra is so close that one is tempted to advance the view that Apastamba knew the extant Mimansa Sutra or an earlier version of it that contained almost the same expressions.**[15]

अत्र नैकस्थलेषु तत्र तत्र प्रसङ्गवशाद् मीमांसाशास्त्रस्य प्रभावः धर्मसूत्राणामुपरि स्यात्। आपस्तम्बधर्मसूत्रे अस्य महान् प्रभावः सुतरां द्योतते। मीमांसोक्तधर्मसम्बद्धव्याख्यानं धर्मसूत्रेषु वर्णाश्रमाणां व्याख्याने प्रमुखस्थानमावहति।

**आपस्तम्बधर्मसूत्रोपरि उत्तरमीमांसासूत्राणां प्रभावः**

आपस्तम्बधर्मसूत्रे विविधशास्त्राणां प्रभावः परिलक्ष्यते। यथा प्राचीनधर्मसूत्रकाराणां प्रभावः प्रतीयते तद्वत् तत्र दर्शनशास्त्रस्यापि प्रभावः लक्ष्यते। यद्यपि शङ्कराचार्यस्य शारीरिकभाष्यात्प्रागेवास्यापस्तम्बधर्मसूत्रस्य प्रणयनमभूत्तथापि वेदान्तोक्त ब्रह्मसूत्रस्य तात्पर्यपर्यवसाने अस्य महत् योगदानमभूत्। वेदान्तोक्तरहस्यमात्मापरमात्मनः तात्पर्यं समन्वयः उपनिषदि प्रतिपादितानां सर्वेषां विषयाणां प्रासङ्गिकयथायथाध्ययनं कृत्वा अस्य सूत्रस्य प्रणयनमापस्तम्बेन कृतं वर्तते। तदर्थमस्य महान् प्रभावः शास्त्रेषु बहुधा उल्लिख्यते। आपस्तम्बधर्मसूत्रे विविधविषयाणां यथा संयोगः प्राप्यते तथा आत्मरहस्यमध्यात्मपटले ससर्गितं वर्तते। तदर्थं विविधसूत्राणि आपस्तम्बेन आम्नातानि सन्ति। तेषां सूत्राणां गहनं पर्यालोचनेन इदं स्पष्टीयते यत् आपस्तम्बधर्मसूत्रं सर्वत्र प्रभावेन प्रभावितो मन्यते।

आपस्तम्बधर्मसूत्रे आत्मज्ञानस्य प्रंशसा भूयसि कृता वर्तते। अतः अस्य श्रेयः उत्तरमीमांसां प्रति याति। तस्मादेव शास्त्रीयविधिना ब्रह्मसूत्रोक्तानामात्मज्ञानप्रशस्तिस्तु लभ्यते।

अतः आत्मज्ञानरूपं फलं सुतरां प्राप्तव्यं भवति। आपस्तम्बेनोक्तं यत् –

**आत्मलाभान्न परं विद्यते।**[16]

अनेनास्पन्दितजनोऽज्ञानावरणे विच्छिन्नो भूत्वा तस्माद्भिन्नत्वमात्मानं न चिन्तयति। अतो वैदिकोपनिषद्भागे यद्विधिः वर्णितः अत्र तस्मादेव धार्मिकक्रियाविधिमुपलक्ष्यापस्तम्बेन प्रतिपादितम्। अत्राध्यात्मपटलोक्ताः विषयाः अधो वक्ष्यन्ते। यथा- आत्मज्ञानोपायाः, आत्मज्ञानप्रशंसा, आत्मज्ञानसम्पादनम्, आत्मज्ञानसाधनानि, आत्मज्ञानप्राप्त्युपायाः, आत्मज्ञानस्वरूपम्, आत्मज्ञानफलम्, आत्मज्ञानलाभयोगाः इत्यादयो विषयाः प्रतिपादिताः सन्ति।

**उपसंहारः**

धर्मसम्बद्धाचारव्यवहारप्रायश्चित्तविधानपरकशास्त्रं धर्मशास्त्रत्वेन यथा संज्ञा लभते तथा मीमांसाशास्त्रमपि धर्मस्य विषयं वक्तुं मुख्यप्रयोजनीयतां विन्दति। अतः उभयोः शास्त्रयोरन्तसम्बद्धः सुतरामुल्लेखयोग्यम्। अत्र धर्मसूत्रेषु सर्वेषु प्राचीनानां स्मार्त्तोक्ततत्त्वानां समायोजनं कृत्वा विषयाः प्रतिपाद्यन्ते। अतः अत्र सर्वत्र तु आपस्तम्बने प्राचीनानां तात्त्विकानां विचाराणां परिशीलनं कृत्वा शास्त्रोक्तविधिना नैकतत्त्वानि प्रतिपादितानि सन्ति। मीमांसायां वैदिकयागानां निन्दाप्रशंसाऽर्थवादपुरस्सरं वर्णनं सम्प्राप्यते। अतः अत्र धर्मस्य प्रतिपत्तिस्तु धार्मिकक्रियाणां संस्कारादीनां वर्णाश्रमकर्मणां सुष्टुसमायोजनेन च प्राप्यते। अतः अस्य वैशिष्ट्यं सुतरां शास्त्राभिहितं च मन्यते।

**सहायकग्रन्थसूची**


१.जैमिनीयन्यायमाला, माधवाचार्यः, आनन्दाश्रममुद्रणालयः, १८९२

२.मीमांसासूत्रम्, जैमिनिः, रमेश बुक् डिपो, जयपुर, राजस्तान, १९५५

३.आपस्तम्बधर्मसूत्रम्, चौखम्बा संस्कृत सीरीज् आफिस् वाराणसी, १९६६

४.वीरमित्रोदयः, मित्रमिश्रः, चौखम्बा संस्कृत सीरीज आफिस, वाराणसी, १९७८

५.धर्मशास्त्र का इतिहास, अर्जुनचौवे काश्यप्, उत्तरप्रदेश हिन्दी संस्थान, लखनऊ, १९९२

६.मनुस्मृतिः, मन्वर्थमुक्तावली सहिता, चौखम्बा संस्कृत सीरीज आफिस्, वाराणसी, १९७०


**संदर्भ ग्रन्थ**

1. पू. मी. सू. १.१.१
2. पू. मी. सू. १.१.२
3. जै. न्या. वि. १.२
4. सं. १.२
5. आ.ध.सू. २.४.८.१३
6. आ.ध.सू. २.६.१४.१३
7. पू. मी. सू. ६.७.३०
8. आ.ध.सू. २.६.१६.११
9. आ.ध.सू. १.४.१२.९
10. आ.ध.सू. १.२९.८
11. पू. मी. सू. ६.१.१४
12. पू. मी. सू. १.३.३.१९
13. पू. मी. सू. ६. ३.२.२२
14. पू. मी. सू. ६.३.३.२५
15. History of Dharmasastra, Page- 42
16. ध. सू. ८.२